International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 2; Issue 3; May 2017; Page No. 280-281

# भारतीयसंस्कृतौ नार्यः वैशिष्टयम्

**माया यादव**

प्रवक्ता संसकृत, रा. व. मा. वि. नाहड़, रेवाड़ी, हरियाणा, भारत।

**प्रस्तावना**

भारतीयसंस्कृतौ नारीणां विलक्षणमेव महत्वमस्ति। अबला: अपि ता: शक्तिस्वरूपिण्य:। कद्चिद् निन्द्या: अपि बहुत्र वन्दनीया:। अस्वतन्त्रा: अपि सर्वङ्कषा:। भोग्या: अपि पूज्या:, हेया: अपि विजेया: । वस्तुतो नार्य:, सृष्टे: उच्चावचं सर्वमपि स्वरूपं संवदन्ति। सूक्ष्मदृष्टया स्त्रीपुरुषयोर्मध्ये भेदो नास्ति। राजशेखर: काव्यमीमांसाया: कथयति---

**"संस्कारो हयात्मनि समवैति, न स्त्रैणं पौरुषं वा विभागमपेक्षते"।**

लोपामुद्रा, विश्ववारा, अपाला, आत्रेयी, काक्षीवती, घोषा च ऋषीका: बभूवु:। ताभिः कृतानि सूक्तानि वैदिकसंहितासु संगृहीतानि सन्ति। उपनिषत्सु मैत्रैयी, गार्गी, वाचन्कवी च विदुष्यो वर्णिता:। तदा स्त्रीणां वेदाध्ययनं वर्जितं नासीत्। तासां समावर्तसंस्कारोऽपि भवति स्म। कालान्तरे स्त्रियः आचार्या उपाध्यायाश्च बभूवुः। पतञ्जलिः स्त्रीणां कृते कुमाराध्यापिका, कुमारपण्डिता, कुमारतापक्षी इत्यादीनां पदानां प्रयोगं करोति। महाभारतानुसारेण स्त्रियो ललितकलासु शिक्षिता:। गाथासप्तशत्यां कवियित्रीभिः रचिता: गाथाः सन्ति। शङ्कराचार्यमण्डमिश्रयोः शास्त्रार्थे मण्डनमिश्रस्य पत्नी परमविदुषी भारती निर्णियिका संजाता। विद्यायाः अधिष्ठात्री देवी सरस्वती स्वयं स्त्रीजातीया अस्ति।

वैदिकयुगे कन्यायाः विवाहो युवावस्थायां भवति स्म। अथर्ववेदे प्रोक्तं "ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्" इति। तदा मन्ये कन्यायाः विवाहः पितृभ्यां गम्भीरसमस्या नासीत्। परवर्तीयुगे कन्यापितृत्वं कष्टाय प्रोक्तम्। तद्यथा पञ्चतन्त्रे-

**"पुत्रीति जाता महतीह चिन्ता कस्मै प्रदेयेति महान् वितर्कः।**
**दत्वा सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टम्।।"**

गार्हस्थ्ये पत्न्याः पातिव्रत्यं प्रशंसास्पदं भवति। शतपथब्राह्मणे वृध्दच्यवनस्य युवती पत्नी कथयति - यस्मै मां पिताऽदात् , नैवाहं तं जीवन्तं हास्यामि - इति। सावित्री पातिव्रत्यबलेन मृतमपि पतिं जीवयति। पार्वती-दमयन्ति- द्रोपदी- प्रभृतीनां चरितेषु भारतीयनारीणामादर्शाः प्रतिष्ठापिताः। महाभारते आदर्शभूता पत्नी परिभाषिता –

**"सा भार्या या गृहे दक्षा सा भार्या या प्रजावती।**
**सा भार्या या पतिप्राणा सा भार्या या पतिव्रता।।**
**अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।**
**भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः।।"**

मातृपदेन स्त्रीजातेःप्रतिष्ठा शिखरीभूता च अस्ति। मातृदेवो भव इत्यपि भारतीयमनुशासनं वर्तते। ऋग्वेदे मातृपदेन पृथिवी सुप्रतिष्ठापिता। अथर्ववेदेऽपि--- मातृशक्ति विषये "माता भूमिः पुत्रोऽहं पृथिव्याः" इत्युक्तम। अत एव देशोऽस्माकं "भारतमाता" इत्युच्यते। मातुः गौरवं महाभारते प्रोक्तम –

**"दशाचार्यनुपाध्याय उपाध्यायान् पिता दश।**
**दश चैव पितृन् माता नास्ति मातृसामो गुरुः।।"**

षोडशप्रकाराः मातरः प्रोक्ताः-

**"स्तनदात्री गर्भदात्री भक्ष्यदात्री गुरुप्रिया।**
**अभीष्टदेवपत्नी च पितुःपत्नी च कन्यकाः।।**
**सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः।**
**मातुर्माता पितुर्मारता सोदरस्य प्रिया तथा।।**
**मातुः पितुश्च भगिनी मातुलानि तथैव च।**
**जनानां वेदविहिता मातरः षोडश स्मृताः।।"**

दिव्विधाः स्त्रियः श्रूयन्ते- कुलस्त्रियः सर्वसाधारणस्त्रियश्च। कुलस्त्रियः कौटुम्बिके जगति माता, पत्नी, भगिनी, पुत्री, पुत्रवधूरित्याद्याः सन्ति। भारतीयसंस्कृतौ कुलस्त्रीणां महती प्रशंसा विहिता।

कुलस्त्री एव स्त्रीजातेः प्रातिनिध्यं करोति। "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति मनुवचनं कुलस्त्रीविषयकमेव प्रतिभाति। सेयं कुलस्त्री स्वातन्त्र्यं नार्हति-

**"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।**
**पुत्राश्च स्थिवरे काले न स्वतन्त्र्यमर्हति।।"**

शाकुन्तले पत्नीषु पतीनां सर्वतोमुखी प्रभुता प्रोक्ता-

**"तदेषा भवतः पत्नी त्यज वैनां गृहाण वा।**
**उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी।।"**

साधारणस्त्रीषु वेश्या, गणिका, स्वैरिणी, पुंश्चली, असती, कुलटा इत्यादिस्त्रिणां गणना भवति। एताः साधारणस्त्रियः दासीरूपेण राजभवनेषु नियुक्ताः अपि बभूवुः। देवलोके यदा अप्सरसो भवन्ति, तथैव देवालयेषु देवदासीनां नियुक्तिरपि पुरा बहुत्र भवति स्म। देवदास्यो देवपूजनावसरे नृत्यगीताभिनयादीन् प्रस्तुवन्ति स्म। पुरा काले एकपत्नीव्रतेन सहैव बहुपत्नीत्वमपि दृश्यते। भगवान रामःएकपत्नीव्रती आसीत्। कृष्णस्य षोडशसहस्त्रङ्ख्याकाः पत्नयः आसन्। कौटिल्यानुसारेण विवाहस्य पश्चात् अष्टौ वर्षाणि पुत्रोत्पत्तिं प्रतीक्ष्य विवाहानन्तरं कुर्तुं शक्यते। विधावाविवाहो निम्नजातिषु भवति स्म।

मध्ययुगे बालविवाहः प्रसृतः। "नारीणां भूषणं लज्जा" इत्यवगुणठप्रथा यथाकालं वस्त्रावगुण्ठनतया स्वीकृता।

महाभारतकालादारभ्य सतीप्रथा मध्ययुगं यावत् श्रूयते। परमार्थसाधने बाधकतया स्त्रीनिन्दा शास्त्रेषु कद्चित् दृश्यते। जैनाः बौध्दाश्च स्वभावादेव स्त्रीणां हीनतां प्रतिपादयन्ति। वैदिकपरम्परायां स्त्रीं विना पुरुषस्य यज्ञकर्म न सम्पद्यते। स्त्री पुरुषस्य अर्धांड्गिनी भवती। शिवोऽपि अर्धनारीश्वरः कथ्यते।

गृहं विना गृहस्थधर्मस्य सम्पादनमेव कथं भवितुमर्हति। एतस्याः धारणायाः अनुसारं गृहस्थाश्रमस्य प्रतिष्ठा एकमात्रं गृहिण्याः उपर्येव आश्रिता आसीत्। ऋग्वेदे कथितमपि अस्ति- हे वधू! त्वं पतिगृहं गच्छ तत्र गत्वा च गृहस्वामिनी च भव –

**इति गृहान् गच्छ गृहपत्नी यथासो** (10.84.26)

सन्ततिः पुत्ररूपेण स्यादथवा पुत्रीरूपेण दव्वपि समानरूपेण प्रियौ आस्ताम्। ते पूषणं प्रार्थयन्ति स्म यत् कमनीयकन्यायाः प्राप्तिर्भवेदिति। कन्यानां तत्र महान् आदरो भवति स्म अ। वैदिककालेऽपि स्वयंवरप्रथा आसीत् अपि च स्त्रियः अपि स्वेच्छया वरं चेतुं शक्नुवन्ति स्म-

**स्वयं सा मित्र वनुते जने चित्**

कन्यायाः विवाहे जाते सति तस्याः यः पुत्रः जायते स्म सः तेषां धनस्य उत्तराधिकारी भवति स्म। कन्याः एका संज्ञा दुहिता इत्यपि अस्ति। शब्दो यं दुह-धातोः निष्पद्यते। एतस्यार्थोऽस्ति दोहनम् इति। एतस्य आधारेण केचन विद्वान्सः कथयन्ति यत् कन्याः आदौ दुग्धदोहनस्य कार्यं कुर्वन्ति स्म। गृहेषु गोरक्षायाः प्रधानकार्यम् एतासां हस्तेष्वेव आसीत्। दुग्ध-दधि-घृतादीनां व्यवस्थामपि एताः एव कुर्वन्ति स्म। कन्याः तथा च स्त्रियः कापार्सवयनस्य वस्त्रवयनस्य चापि कार्यं कुर्वन्ति स्म। एतस्मिन् सन्दर्भे अनेके मन्त्राः अपि सन्ति-

**साध्वपांसि सनता न उक्षिते, उषासानक्ता वय्येव रण्विते।**
**तन्तुं त तं संवयन्ती समीची, यज्ञस्य पेशः सुदुधे पयस्वती।।** (2.3.6)

कन्याः कलशे जलं प्रपूर्य आनयन्ति स्म। पितरौ जलं न पूरयेताम् इति ते वदन्ति स्म। कृषिकार्यमपि ताः एव कुर्वन्ति स्म। कन्यायाः रक्षां पिता करोति स्म। पिता चेत् स्यात् तदा ज्येष्ठभ्राता कन्यायाः रक्षां विवाहं च कारयति स्म। वृद्धावस्थां यावत् नारी स्वगृहे प्रभुत्वं धारयति स्म। पशुपक्षिणी-वीरप्रसविनीनारीणां च तस्मिन् काले विशेषादरः भवति स्म। एतादृशायाः नार्याः प्राप्तये देवाः प्रार्थयन्ते स्म-

**अघोरचक्षुरपतिध्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः**
**वीरसूर्देवकामा स्योना शं नो भव दिव्पदे शं चतुष्पदे।।** (10.84.44)

नारी ब्राह्मणेभ्यः दानं स्मा। स्त्रिया धनस्य कश्चित् नियतभागः प्राप्यते स्म, यस्मिन् धने केवलं तस्याः एव अधिकारः भवति स्म। अनेन प्रकारेण आर्यजातौ प्राचीनकालदेव नार्यः समादरो भवति स्म।

वेदानाम् अनुशीलनेन अवगम्यते यत् आर्येषु स्त्रिशिक्षायाः यथेष्टं प्रचारः असीत्। स्त्रियः वेदाध्ययनं कुर्वन्ति स्म कवितानामपि ताः रचनां कुर्वन्ति स्म। ताः नैजत्यागस्य तपसः च प्रभावात् ऋषित्वं प्रापुन्वन्ति स्म मन्त्राणां चापि साक्षात्कारं कुर्वन्ति स्म। ऋग्वेदस्य अनेकसूक्ताम् आविष्कारः स्त्रिभिः कृतः अस्ति, इदम् अस्माभिः चर्चितमस्ति। केषुचित् सूक्तेषु एतादृशाः मन्त्राः सन्ति यैः ज्ञायते यत् आर्यजनाः विवाहकाले वरं कन्यां च विविधवस्त्राभूषणैःअलड्कुर्वन्ति स्म सम्माननं च तयोः कुर्वन्ति स्म। जनाः स्त्रियः प्राणरक्षायै मर्यादारक्षायै च महान्ति अपि सहर्षं सहन्ते स्म। स्त्रियः यज्ञकर्मणि अपि नियुक्ता भवन्ति स्म। स्त्री स्वपत्युः अधीना भवति स्म, परन्तु गृहस्य अन्येषु सर्वेषु पदार्थेषु तस्याः एव प्रभुत्वं भवति स्म। गृह्यकर्मकराणाम् उपरि अपि तस्याः एव शासनं भवति स्म। वरः वधू च यदा सहैव उपविशतः स्म तदा गुरुवः देवाः च वध्वः सौभाग्याय प्रार्थयन्ते स्म। इयं प्रथा आध्यावधि प्रचलिता अस्ति। अद्यापि निम्नाडिकतमन्त्रं पठित्वा सिन्दूरः सौभाग्यवर्धकाशीर्वचनं तस्यै दीयते-

**सुमंगलीरिया वधूरिमां समेत पश्यत।**
**सौभाग्यमस्यै दत्वा यायास्तं वि परेतन।।**

अर्थात परमकल्याणमयीवधू अत्र उपविष्टा अस्ति, गुरुवः देवाः च भवन्तः सर्वे अत्रागच्छन्तु, कृपादृष्ट्या एतां पश्यन्तु सौभाग्यसूचकाशीर्वचोभिः अनुगृह्णन्तु इमाम्।

तत्र मन्त्रैः सूच्यते यत् स्त्रियःसंगीतादिषु अपि निपुणाः भवन्ति स्म। एतदतिरिच्य पतिना सह स्त्रियः युध्देडपि भागं नयन्ति स्म। विश्यला स्वपतिना सह युध्दम् अगच्छत् तत्र तस्याः जंघा व्रणिता। अश्विनीकुमारौ तस्याः चिकित्साम् अकुरुताम। नमुचिसमी पि आसीत। वृत्रासुरेण सह तस्य माता दनुः अपि अयुध्दयत् इन्द्रेण सा हता। वैदिकसाहित्येन अवगम्यते यत् प्राचीनकालेनस्त्रियः वेदाध्ययनं कुर्वन्ति स्म यज्ञोपवीतं च धरन्ति स्म। सुलभा-मैत्रीय-गाग्यार्दयः स्त्रियः विदुष्यः आसन्। वैदिकसाहित्यस्य प्रभावः वाल्मीकिरामायणे अपि द्रष्टुं शक्यते। सीता वैदिकप्रार्थनां करोति स्म। कौशल्यायाः विषये उच्यते यत् सा मन्त्रापाठपूर्वकम् अग्निहोत्रं करोति स्म। वीरमित्रोदयस्य संस्कारप्रकाशे स्त्रीणां द्वौ भेदौ कृतौ-एका ब्रह्मचारिणी अपरा च सद्योद्वाहा। अत्र "ब्रह्मवादिनीनामग्नीन्धनं वेदाध्ययनं स्वगृहे च भैक्षचर्या"- ब्रह्मवादिनीस्त्रीभ्यः अधिकारः आसीत् यत् ताः अग्निहोत्र-वेदाध्ययने स्वगृहे चैव भिक्षाटनं कुर्युः। एतस्मात ज्ञायते यत् सर्वसाधारणस्त्रिभ्यः अयमधिकारः नासीत्। आदौ सर्वासां स्त्रीणां कृते अयम् अधिकारः आसीत् परन्तु अवान्तरकाले स्त्रियः वेदाध्ययनं न कर्तुं शक्नुवन्ति इति कथितम्। यमस्मृतौ उक्तमस्ति यत्-"पूर्वकाले कुमारीणाम् उपनयन-वेदारम्भ-गायत्र्युपदेशाः च भवन्ति स्म परन्तु तासाम् अध्यापकाः केवलं पिता, पितृव्यः ज्येष्ठभ्राता एव भवति स्म। अन्यस्य कस्यापि अयम् अधिकारः नासीत् यत् सः ताः पाठयेत्।–

**पुराकल्पे कुमारीणां मौंजीबन्धनमिष्यते।**
**अध्यापनं च वेदानां सवित्रीवचनं तथा।**
**पिता पितृव्यो भ्राता वा नैनामध्यापयेत् परः।।**

वेदमन्त्रैः अवगम्यते यत् स्त्रियः सुन्दरवस्त्राणि धरन्ति स्म, कार्पासवस्त्राणि एव ताः केवलं धरन्ति स्म, वयन्ति स्म ऊर्णवस्त्रपरिधानस्य अपि रीतिः आसीत्। तन्तुवायाः अपि तस्मिन् काले भवन्ति स्म। हस्तयोः कड.कणधारणस्य अपि रीतिः आसीत्। आभूषणायुध-माला-कण्ठहार-वलयादीनि अपि सुवर्णमयानि भवन्ति स्म। कुत्रचित् मन्त्रेषु उक्तं पतिः स्त्रियः वस्त्रं न धरेत्, अन्यथा श्रियः हानि भवन्ति-

**अश्रीरा तनूर्भवति रुशती पापयामुया।**
**पतिर्यदव्ध्वो3 वाससा स्वमंगलमभिधित्सते।।**(10.84.30)

अनेन प्रकारेण अस्माभिः अवगतं यत् भारतीयसंस्कृतौ नार्यः वैशिष्टं स्थानं वर्तते।

**।।इति शम्।।**